केरळपाठावलिः

# संस्कृतम्

## नवमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

भागः 2 $\frac{2}{2}$

# KERALA READER SANSKRIT

STANDARD

9

For Academic and Sanskrit Schools

PART - 2 $\frac{2}{2}$

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2019

NT-897-1-SANSKRIT-9-A/S-VOL.2

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च। मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
Printed at : KBPS, Kakkanad, Kochi-30
Department of General Education, Government of Kerala

## भूमिका

प्रिय छात्राः !

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखविकासः एव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयं पठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

अष्टमकक्ष्याया अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां द्रढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्तानि।

पाठपुस्तकस्यास्य द्वितीयभागे एककद्वयम् अस्ति।। विषयानुसारमेव एककस्य नाम। प्रत्येकम् एककस्य प्रारम्भे आमुखम्, प्रवेशकप्रवर्तनं च दत्तमस्ति। पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्तानि। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्ताः। एष भागः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय। एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

राष्ट्रिय-कर्मनैपुणीपद्धतिं (NSQF) यदृच्छया समागच्छन्तीं दुर्घटनां निवारयितुं समर्थानि, जीवननैपुणीसंवर्धकानि प्रवर्तनानि तथा समग्रशिक्षा द्वारिकायाः कृते सूचना संवेदन तान्त्रिक- (ICT) साध्यताश्च परिगणय्य समुष्टीकृतं वर्तते इदं पाठपुस्तकम्।

भाषापठनमनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं सफलं च भवतु इति आशासे।

**डा.जे.प्रसाद्**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरळम्।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

**STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA**

# भागः 2

## विषयानुक्रमणिका


| एककम् | | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|---|
| III | सञ्जीवनी | ६ | श्लाघ्यं कलापैतृकम्। | (विवरणम्- ई लेखः) | ७९ |
| | | ७ | संरक्षितोऽहं त्वया। | (पटकथा) | ८७ |
| IV | चिन्तामणिः | ८ | शास्त्रं विज्ञानपूर्तये। | (विवरणम् ) | १०२ |
| | | ९ | आत्मबोधो विमुक्तये | (जीवनचरितम्) | ११० |
| | | १० | वंशानुचरितम् | (चरित्रकाव्यम्) | ११९ |

## पुस्तकसंरक्षणम्

‘तैलाद्रक्ष जलाद्रक्ष रक्ष मां श्लथबन्धनात्।
परहस्तगताद्रक्ष’- नित्यं रोदिति पुस्तकम्।।

## संस्कृतभाषा

भाषासु मधुरा रम्या हृद्या गीर्वाणभारती।

## विद्यायाः महत्वम्

सर्वेषां शोभमानानां शोभनतमा विद्या।

एककम्
३

# सञ्जीवनी



## आमुखम्

काव्यास्वादने सहृदयानां सञ्जीवनौषधं भवति दृश्यकाव्यम्। भिन्नरुचेः जनस्य समाराधकं दृश्यं भवति नाट्यम्। अतः सञ्जीवनी नामके अस्मिन्नेकके कूटियाट्टमधिकृत्य ई लेखरूपं **श्लाघ्यं कलापैतृकम्** इति , मृच्छकटिकप्रकरणमाधारीकृत्य **संरक्षितोऽहं त्वया** इति पटकथा च अन्तर्भवतः।

**प्रवेशकः** - **केरलीयकलारूपाण्यधिकृत्य चर्चित्वा कक्ष्यायाम् अवतारयतु।**

# पाठः ६

# श्लाघ्यं कलापैतृकम्



संस्कृतोत्सवे ‘कूटियाट्टम्’ प्रतियोगितायां पुरस्कृता बालिका तद्विषये विशेषज्ञानार्जनाय कूटियाट्टाचार्येभ्यो ‘इ लेख’द्वारा (E-mail) सन्देशं प्रेषयति।




कूटियाट्टमधिकृत्य विशदीकरणम् पृष्ट्वा।

koodiyattamkeralam@gmail.com

कूटियाट्टमधिकृत्य विशदीकरणम् पृष्ट्वा।

कूटियाट्टकलारूपस्याभिनयेन अस्य महिमानमौन्नत्यं च अवगन्तुमवसरो लब्धः। अत एव तत् कलारूपं यथाशास्त्रं पठितुमिच्छाम्यहम्। तदर्थं भवतः साहाय्यं प्रार्थये। मम ‘ ई लेखं ’ प्रति विवरणं सदयं प्रेषयन्तु भवन्तः।

सविनयम्
सविता।




प्रियवत्से !

भवत्याः ई लेखः पठितः। कूटियाट्टपठने औत्सुक्यं ज्ञात्वा नितरां तुष्यामि। शुभाशंसामर्पये। अधुना लोके परिलसत् संस्कृतदृश्यकलारूपं भवति कूटियाट्टम्। एतत् केरलीयसंस्कृतरूपकाभिनयः भवति। कूटियाट्टम् इति मलयालपदस्य सन्ति बहूनि निर्वचनानि। एतेषु प्रायेण मिलित्वा नटनम् इति व्याख्यानमेव स्वीक्रियते। वाद्य - सङ्गीत - नृत्त - अभिनयानां समन्वय एवास्य विशेषता। आङ्गिक - सात्विक - वाचिक - आहार्यरूपाः चतुर्विधाभिनयाः अस्मिन् प्रयुज्यन्ते। अस्य पौराणिकतां साहित्यसम्पुष्टतां च निरीक्ष्य युनेस्को संस्थया २००६ तमे वर्षे विश्वपैतृककलारूपेण समादृतमिदं कलारूपम्।

यद्यपि कूत्तम्बलेष्वेव अस्य रङ्गाविष्कारः प्रवृत्त आसीत् तथाप्यधुना विख्यातेषु सदस्सु पण्डितसभासु चास्य प्रयोगः संलक्ष्यते। भास-बोधायन-महेन्द्रविक्रम-श्रीहर्ष-शक्तिभद्र-कुलशेखर-नीलकण्ठप्रभृतिभिः विरचितानि रूपकाण्येव कथावस्तुरूपेण स्वीकृतानि।




कूटियाट्टमधिकृत्य विशदीकरणम् पृष्टा।

koodiyattamkeralam@gmail.com

कूटियाट्टमधिकृत्य विशदीकरणम् पृष्टा।

पूर्वरङ्गक्रिया, सूत्रधारप्रवेशः, कथापात्रप्रवेशः, निर्वहणम्, सरूपकावतारणम्, भरतवाक्यम्, मुटियक्किक्त्ता इत्येवमभिनयक्रमाः अस्मिन् विद्यन्ते। मिष़ाव् , इटक्का , कुषि़त्तालं , शङ्खः, कुरुङ्कुष़ल् इत्यादीनि वाद्योपकरणानि अप्युपयुज्यन्ते।

केरलकलामण्डले तथा केन्द्रीयसंङ्गीतनाटकअक्कादमीद्वारा अङ्गीकृतेषु अष्टसु केन्द्रेषु च कूटियाट्टपठनाय अवसराः वर्तन्ते। एतदधिकृत्य सविशदं विवरणं लब्धुं www.sanskrit kerala.gov.in गूगिल् , विक्किपीडिया, समग्रा आदयः साहायकाः भवन्ति। । पुनरपि भवत्याः जिज्ञासाभरितं लेखं प्रतीक्ष्य

सस्नेहम्

चाक्यारः।

**पदच्छेदः**

| | |
|---|---|
| अत एव | अतः +एव । |
| अप्युपयुज्यन्ते | अपि +उपयुज्यन्ते। |
| अवसरो लब्धः | अवसरः + लब्धः। |
| इत्येव | इति + एव । |
| एवास्याः | एव + अस्याः। |
| कूत्तम्बलेष्वेव | कूत्तम्बलेषु + एव। |
| चास्य | च + अस्य। |
| तथाप्यधुना | तथापि + अधुना । |
| पठितुमिच्छाम्यहम् | पठितुम् + इच्छामि +अहम्। |
| पुनरपि | पुनः + अपि। |
| रूपाण्येव | रूपाणि+ एव। |
| समन्वय एव | समन्वयः + एव। |

**विग्रहः**

| | |
|---|---|
| औन्नत्यम् | उन्नतेः भावः। |
| औत्सुक्यम् | उत्सुकस्य भावः। |
| जिज्ञासाभरितं | ज्ञातुम् इच्छा जिज्ञासा,तया भरितम्। |
| यथाशास्त्रम् | शास्त्रम् अनतिक्रम्य। |
| सविनयम् | विनयेन सह वर्तते यस्मिन् कर्मणि। |

**धातुपरिचयः**

| | | | | |
|---|---|---|---|---|
| प्रेषयति | - | प्र + एष् | - | परस्मैपदि लट् प्र पु ए.व (णिच्) |
| तुष्यामि | - | तुष् | - | प प - लट् उ पु - ए व |
| प्रयुज्यन्ते | - | प्र + युज् | - | आ प -लट् प्र पु -ब व (कर्मणि) |
| संलक्ष्यते | - | सम् + लक्ष् | - | आ प -लट् प्र पु -ए व (कर्मणि) |
| विद्यन्ते | - | विद् | - | आ प -लट् प्र पु -ब व |
| वर्तन्ते | - | वृतु | - | आ प -लट् प्र पु -ब व |

# पठनप्रवर्तनानि।

**कञ्चन कूटियाट्टकलाकारं समेत्य अभिभाषणं कृत्वा कूटियाट्टमधिकृत्य लघुविवरणं करोतु।**

**श्रद्धेयांशौ**

आशयव्यक्तता।

समग्रता।

**अनुबन्धे दत्तं कीलफलकं दृष्ट्वा संस्कृतलिपिविन्यासं परिचिनोतु , स्वनाम्नि ई-लेखसङ्केतमपि निर्मातु।**

**कूटियाट्टमधिकृत्य अधिकविस्तराय koodiyattam keralam@gmail.com इति सङ्केतं प्रति ई लेखं प्रेषयतु। कूटियाट्टस्य चित्राणि समाहृत्य एकं चित्रपुटं निर्मातु।**

**श्रद्धेयांशाः**

वैचित्र्यम्।

आकर्षणीयता।

औचित्यम्।

**कमपि विषयमधिकृत्य ई-लेखसङ्केतमुपयुज्य मित्रं प्रति लेखमेकं लिखतु।**

**श्रद्धेयांशाः**

लेखस्य घटना।

समग्रता।

विषयानुबन्धिता।

## अधिकविस्तरः ।

### अभिनयक्रमः ।

| | | |
|---|---|---|
| **पूर्वरङ्गक्रिया** | - | कूटियाट्टं पूर्वरङ्गेणैव आरभते। रङ्गसज्जीकरणानन्तरं रङ्गशुद्धीकरणम् । कैरल्याम् अरङ्ङुतलि ( അരങ്ങുതളി) इत्युच्यते। |
| **सूत्रधारप्रवेशः** | - | तत्र सूत्रधारः त्रिवर्तिकं दीपं प्रज्वाल्य नान्दीश्लोकं पठति। जलगन्धपुष्पैः आराध्य ब्रह्मदेवमभिवाद्य रङ्गम् अभिवन्द्य च नेपथ्यं प्रविशति। |
| **कथापात्रप्रवेशः** | - | कथापात्राणि यवनिकां गृहीत्वा वेदिकायाः वामभागतः प्रविशति। |
| **निर्वहणम्** | - | कथासङ्ग्रहस्य परिचायनम्। (पूर्वकथायाः श्लोकरूपेणावतारणम्) |
| **रूपकावतारणम्** | - | कथापात्राणामभिनयः। |
| **भरतवाक्यम्** | - | संस्कृतरूपकाणामन्ते आयोजितम् आशीश्श्लोकः भवति भरतवाक्यम्। |
| **मुटियक्कित्ता** | - | कूटियाट्टम् एकं यज्ञमिति विभाव्य यज्ञेषु कृतसदृशं सर्ववस्तुसमर्पणं भवति मुटियक्कित्ता। |

### क्रियारूपपरिचयः ।

प्रेषयिष्यामि - प्र पूर्वक एष् गत्यर्थे णिचि परस्मैपदि लृट् लकारः।

| लटि रूपाणि | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम् ।** |
|---|---|---|---|
| **प्र.पु** | प्रेषयति | प्रेषयतः | प्रेषयन्ति |
| **म.पु** | प्रेषयसि | प्रेषयथः | प्रेषयथ |
| **उ.पु** | प्रेषयामि | प्रेषयावः | प्रेषयामः। |

| कूटियाट्टे उपयुज्यमानाः ग्रन्थाः | | |
|---|---|---|
| भासनाटकचक्रम् | भासः | क्रि.प द्वितीयशतकम् |
| भगवदज्जुकम् | बोधायनः | क्रि.प द्वितीयशतकम् |
| मत्तविलासप्रहसनम् | महेन्द्रविक्रमः | क्रि.प सप्तमशतकम् |
| नागानन्दम् | श्रीहर्षः | क्रि.प सप्तमशतकम् |
| आश्चर्यचूडामणिः | शक्तिभद्रः | क्रि.प अष्टमशतकम् |
| तपतीसंवरणम् | कुलशेखरः | क्रि.प त्रयोदशशतकम् |
| सुभद्राधनञ्जयम् | कुलशेखरः | क्रि.प त्रयोदशशतकम् |
| कल्याणसौगन्धिकम् | नीलकण्ठः | क्रि.प त्रयोदशशतकम् |

## संस्कृतकीलफलकम्।



# पाठः ७

# संरक्षितोऽहं त्वया

**पटकथा**

**(मृच्छकटिकाख्यस्य प्रकरणस्य आविष्कारः)**

दृश्यश्रव्यभेदेन काव्यं द्विविधम्। दर्शनेनास्वदनीयं दृश्यप्रभेदं भवति दृश्यकाव्यम्। तस्यैव रूपकमिति नामान्तरमस्ति। दशविधानि रूपकाणि सन्ति। इतिवृत्तं नायकः रसः इत्येतानि आश्रित्यैव रूपकाणां भेदः परिकल्पितः। तेष्वन्यतमं भवति प्रकरणम्। अश्वघोष-भास- कालिदास- दिङ्नाग- शूद्रक-श्रीहर्ष- विशाखदत्त- भट्टनारायण-भवभूति - शक्तिभद्रादयो विख्याताः नाटककारा एव। एषु शूद्रकेण विरचितं प्रकरणं भवति मृच्छकटिकम्।

**दशरूपकाणि**

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।

*(साहित्यदर्पणे षष्ठपरिच्छेदः)*

**प्रकरणं**

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।।
सापायधर्मकामार्थपरो धीरप्रशान्तकः।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्।।

*(साहित्यदर्पणे षष्ठपरिच्छेदः)*



## पटकथा

उज्जयिन्याः वणिक् चारुदत्तः अतिदानेन दरिद्रः संवृत्तः। तस्य जीवनचरितमेव मृच्छकटिकम् इति प्रकरणस्य प्रतिपाद्यम्। दशभिः अङ्कैः ग्रथितस्य अस्य आर्यकापहरणम् इति सप्तमाङ्कात् स्वीकृतः कश्चिदंश एवात्र पटकथारूपेण अवतार्यते।

## दृश्यम् १

(प्रभातम्। पुष्पकरण्डकं नाम जीर्णोद्यानम्। उद्यानं सर्वतः कुसुमिताः वृक्षाःसन्ति। कुसुमात् कुसुमं मधुपाः प्रविचरन्ति। उज्जयिन्याः वणिक् चारुदत्तः सखा मैत्रेयो नाम विदूषकश्च उद्यानं प्रविशति। चारुदत्तः आरामशोभया व्यामुग्ध इति तस्य प्रसन्नतया सुव्यक्तमेव। तत्र



कुत्रचित् असंस्काररमणीये शिलातले विदूषकः प्रथमम् उपविशति। ततः उपवेशनाय चारुदत्तं प्रेरयति च।)

**विदूषकः - मनोहरमिदं शिलातलम्। उपविशतु भवान्।**

(चारुदत्तः उपविशति। कस्यापि आगमनं प्रतीक्ष्य वर्तते सः। तस्य मुखमाकुलं दृश्यते। वर्धमानकस्य आगमने विलम्ब एव तस्याकुलतायाः कारणम्। सः विदूषकं पृच्छति)

**चारुदत्तः - वयस्य, मैत्रेय! एतावत्पर्यन्तं वर्धमानकः न आगतः किल?**

---

### पदच्छेदः

विदूषकश्च - विदूषकः + च ।

कुर्वन्नस्ति - कुर्वन् + अस्ति ।

### पदार्थः

वणिक् - क्रयविक्रयकर्ता।

असंस्काररमणीये - निसर्गसुन्दरे।

व्यामुग्धः - आकृष्टचित्तः।

वयस्यः - वयसा तुल्यः । प्राणिनां कालकृतावस्थाविशेषो वयः।

### विग्रहः

जीर्णोद्यानम् - जीर्णं च तदुद्यानं च।

मधुपाः - मधु पिबन्ति इति मधुपाः।

वणिक् - पणते क्रयविक्रयादिना व्यवहरतीति वणिक्।

**विदूषकः - वसन्तसेनां गृहीत्वा अवधानतया आगन्तव्यम् इत्युक्तम्।**

**चारुदत्तः - पुनः विलम्बस्य हेतुः कः स्यात्?**

(अस्वस्थः चारुदत्तः उत्थाय उद्यानद्वारं गच्छति। चिन्तामग्नः सः शिलातलं प्रत्यागच्छति। एवमाकुलतया गमनागमनं कुर्वन्नस्ति ।)

**दृश्यम् २**

(मध्याह्नः। शीतलच्छायापूर्णे उद्याने आतपस्य पीडा तावन्नास्ति। खिन्नमानसः चारुदत्तः नम्रशिरस्कः उपविशति। विरहितोऽयं कोकिलानां कूजनेन अस्वस्थः लक्ष्यते। उद्यानस्य



प्रवेशद्वारस्य विदूरं दृश्यम्। वृषभशकटस्य घण्टानादः आराच्छ्रूयते। शकटम् उद्यानस्य प्रवेशद्वारमागत्य तिष्ठति। शकटस्य समीपदृश्यम्। चालको वर्धमानकः यानादवतीर्य विदूषकसमीपं गच्छति। तस्मै यानमागतमिति निवेदयति। विदूषकः चारुदत्तमुपेत्य प्रियं निवेदयति।)

**पदच्छेदः**

इत्युक्तम् - इति + उक्तम् ।

तावन्नास्ति। - तावत् + न+अस्ति।

विरहितोऽयम् - विरहितः + अयम्।

आराच्छ्रूयते। - आरात् + श्रूयते।

**पदार्थः**

अवधानतया - श्रद्धया।

जवनिका - आच्छादनवस्त्रम्।

**विग्रहः**

जवनिका - जूयते आच्छाद्यते अनया इति जवनिका।

खिन्नमानसः - खिन्नं मानसं यस्य सः।

नम्रशिरस्कः - नम्रं शिरः यस्य सः।

**विदूषकः - भो! सम्प्राप्ता वसन्तसेना।**

(वार्तां श्रुत्वा सन्तुष्टः चारुदत्तः मुखम् उन्नीय सामोदं विदूषकं पश्यति।)

**चारुदत्तः - प्रियं नः प्रियम्।** (सः वसन्तसेनामानय इति मैत्रेयं निर्दिशति।)

**चारुदत्तः - सखे! मैत्रेय! अवतारय वसन्तसेनाम्।**

**दृश्यम् ३**



(यानस्य पार्श्वदृश्यम्। तस्य पश्चाद् भागः जवनिकया आच्छादितः अस्ति। मैत्रेयः यानसमीपं गच्छति। यानाद् बहिः निगडबद्धौ पादौ जानुमात्रं दृश्येते। सः यानास्तरणम् ईषदपसारयति। तत्र वसन्तसेनायाः स्थाने पुरुषमेकं पश्यति। चरणबद्धं दृष्ट्वा मैत्रेयः भीतः जायते। सः चारुदत्तमेवमुच्चैर्वदति।)

**मैत्रेयः - नासौ वसन्तसेना , असौ वसन्तसेनः।**

(वसन्तसेनादर्शनोत्सुकः चारुदत्तः तम् एवं वदति।)

---

**पदार्थः**

| | |
|---|---|
| यानास्तरणम् | - यानपरिस्तोमः। |
| ईषद् | - अल्पम् । |
| जानुमात्रं | - जानु प्रमाणम्। |
| अपसारयति | - अनावृणोति। |
| निगडः | - लोहमयबन्धनोपकरणम्। |

**विग्रहः**

| | |
|---|---|
| सामोदं | - आमोदेन सह वर्तत इति। |
| निगडः | - निगलति बध्नाति इति निगडः। |

**चारुदत्तः - अलं परिहासेन। न कालमपेक्षते स्नेहः । अथवा स्वयमेव अवतारयामि।**

(चारुदत्तः वसन्तसेनाम् अवतारयितुं वाहनम् उपगच्छति। सः आस्तरणमपसार्य यानमधिरोहति।)

## दृश्यम् ४

(यानस्यान्तर्भागः। भीतः आर्यकः । चारुदत्तः निगडबद्धम् आर्यकं पश्यति। सोऽपि तत्र उपविश्य पृच्छति।)

**चारुदत्तः - को भवान्?**

**पुरुषः - शरणागतो गोपालको आर्यकोऽस्मि।**

(आर्यकशब्दश्रवणेन चारुदत्तः चिन्ताग्रस्तः भवति।)

**चारुदत्तः - राज्ञा पालकेन कारागारे बद्धः आर्यको वा?**

**आर्यकः - आम्।**

**चारुदत्तः - विधिना एव भवान् मम पुरतः आगतः।**

**मम प्राणापायेऽपि शरणागतं त्वां न त्यजामि।**

(आर्यकः दीर्घं निश्वसिति। आर्यकस्य चरणाभ्यां निगडापनयनाय चारुदत्तः वर्धमानकं निर्दिशति।)

**चारुदत्तः - वर्धमानक! चरणान्निगडमपनय।**

**वर्धमानकः - अपनीतानि निगडानि।**(सः तथा करोति।)

(बन्धनान्मुक्तः सन्तुष्टः आर्यकः चारुदत्तं प्रणम्य एवं वदति।)

---

### आशयः

**न कालमपेक्षते स्नेहः-** इष्टजनस्य दर्शनाय प्रणयिनः कालविलम्बं न सहन्ते। इति।

### पदच्छेदः

सोऽपि - सः + अपि।
को भवान् - कः + भवान् ।
आर्यकोऽस्मि - आर्यकः + अस्मि।
प्राणापायेऽपि - प्राणापाये + अपि।
चरणान्निगडमपनय - चरणात्+निगडम्+अपनय।

### पदार्थः

प्राणापायेऽपि - मरणे अपि।
कारागारे - बन्धनगृहे।
अपनय - निवारय।

### विग्रहः

शरणागतः - शरणम् आगतः/ शरणाय आगतः
चिन्ताग्रस्तः - चिन्तया ग्रस्तः
कारागारे - कारायै बन्धनाय आगारम्,तस्मिन्

**आर्यकः - स्नेहमयान्यन्यानि दृढतराणि दत्तानि।**

(तयोर्वार्तालापं शृण्वन् मैत्रेयः परिहासरूपेण चारुदत्तं वदति।)

**मैत्रेयः - संगच्छ निगडानि। एषोऽपि मुक्तः। साम्प्रतं वयं व्रजिष्यामः।**

(यानस्य अन्तर्भागः। चारुदत्तार्यकौ वार्तालापं कुरुतः। आर्यकः ततः गमनोत्सुकः भवति।)

**आर्यकः - श्रीमन्! इतः गन्तुमनुज्ञा दीयताम्।**

(चारुदत्तः दक्षिणहस्तेन मार्गं निर्दिश्य वदति)

**चारुदत्तः - गम्यताम्।**

**आर्यकः - तर्हि अवतरामि।**

(आर्यकः यानादवतरितुं यतते। किन्तु चारुदत्तः तं निवारयति।)

**चारुदत्तः - सखे, नावतरितव्यम्। कारागृहात् पलायितस्य भवतः बहिर्गमनं न युज्यते। रक्षिपुरुषाः सर्वत्र अटन्त्यधुना। अतः अनेन यानेनैव गम्यताम्। मम शकटमिदं विश्वासपात्रं भवति तेषाम्।**

**आर्यकः - तथास्तु।**

(चारुदत्तः शकटादवतरति। शाकटिकः शकटमारोहति।)

**चारुदत्तः - नायं देशः सुरक्षितः। अतः शीघ्रं गच्छतु भवान्।**

(अञ्जलीबद्धः आर्यकः चारुदत्तं यात्रानुमतिं पृच्छति। तौ वचनप्रतिवचनरूपेण एवं वदति।)

---

**आशयः**

**स्नेहमयान्यन्यानि दृढतराणि दत्तानि।**

इदानीम् आर्यकः लोहमयबन्धनान्मुक्तः। किन्तु ततोऽपि बलवता स्नेहपाशेन बद्धः इति तात्पर्यार्थः।

**पदच्छेदः**

बहिर्गमनम् - बहिः + गमनम्।

अटन्त्यधुना - अटन्ति + अधुना।

**पदार्थः**

| | | |
|---|---|---|
| संगच्छ | - | धारय। |
| साम्प्रतं | - | इदानीम् |
| व्रजिष्यामः | - | गमिष्यामः |
| अटन्ति | - | भ्रमणं कुर्वन्ति |
| रक्षिपुरुषाः | - | राजपुरुषाः/भटाः |

**विग्रहः**

साम्प्रतम्- सम्प्रति भवम्।

शाकटिकः- शकटेन गच्छति इति ।

क्षेमेण व्रज बान्धवान् ननु मया लब्धो भवान् बान्धवः
स्मर्तव्योऽस्मि कथान्तरेषु भवता स्वात्मापि विस्मर्यते।
त्वां रक्षन्तु पथि प्रयान्तममराः संरक्षितोऽहं त्वया
स्वैर्भाग्यैः परिरक्षितोऽसि ननु हे तत्रापि हेतुर्भवान्।।

आर्यकः - पुनर्मिलावः।

चारुदत्तः - तथास्तु।

(इति निष्क्रान्तः)

---

**आशयः**

**संगच्छ निगडानि। एषोऽपि मुक्तः। साम्प्रतं वयं व्रजिष्यामः।**

आर्यकस्य बन्धनाय उपयुक्तां शृङ्खलां स्वीकरोतु भो। एषः आर्यकः बन्धनात् मोचितः किल। इदानीं वयं कारागारं गमिष्यामः इत्यर्थः। नियमसंहितानुसारम् अपराधिनः संरक्षणमपि अपराध एव। अत्र अपराधिने आर्यकाय चारुदत्तः शरणं ददाति चेत् तदपि अपराधः भविष्यति। तदर्थं कारागृहं गन्तव्यं भवेदित्याशयः (एषः आर्यकः शृङ्खलाबन्धनात् मुक्तिं प्राप्तः। इदानीं वयं सर्वे आत्मरक्षणाय इतः गमिष्याम इति भावः)

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| बान्धवान् | बन्धुजनान् |
| क्षेमेण व्रज | कुशलेन गच्छ |
| ननु मया | निश्चयेन (आर्यकेण) |
| भवान् | त्वम् (चारुदत्तः) |
| बान्धवः | बन्धुः |
| लब्धः | प्राप्तः |
| भवता | त्वया (आर्यकेण) |
| कथान्तरेषु | उचितसन्दर्भेषु |
| अहम् | अहम् (मां इति यावत्) |
| स्मर्तव्यःअस्मि | स्मरणीयो भवामि। |
| स्वात्मापि | आत्मानमपि |
| विस्मर्यते। | विस्मरणीयो भवति |
| प्रयान्तम् | गच्छन्तं |
| त्वाम् | भवन्तम् |
| अमराः | देवाः |
| पथि | अध्वनि (मार्गे इत्यर्थः) |
| रक्षन्तु । | परिपालयन्तु । |
| त्वया | चारुदत्तेन |
| अहम् | आर्यकः |
| संरक्षितः | परित्रातः |
| त्वं स्वैः भाग्यैः | स्वीयैः पुण्यैः |
| परिरक्षितः असि। | परित्रातः असि। |
| ननु हे | निश्चयेन हे महात्मन्! |
| तत्रापि भवान् | आर्यकरक्षणे चारुदत्त |
| हेतुः। | एव कारणम्। |

## पठनप्रवर्तनानि।

**पटकथांशं भावानुसारं पठतु।**

**श्रद्धेयाः अंशाः**

आशयावगमः।

पदच्छेदः।

पदार्थज्ञानम्।

**पटकथांशं पठित्वा कथारूपेण सङ्क्षिप्य लिखतु।**

**श्रद्धेयाः अंशाः**

आशयसंग्रहः।

उचितपदस्वीकारः।

भाषाशुद्धिः।

कथाशैली।

**अधोदत्तानाम् अव्ययानां पट्टिकां कृत्वा कानिचित् उपयुज्य वाक्यानि रचयन्तु।**

**श्रद्धेयाः अंशाः**

अव्ययज्ञानम्।

पट्टिकाकरणसामर्थ्यम्।

भाषाप्रयोगः।

| | | | | | |
|---|---|---|---|---|---|
| गत्वा | गृहीत्वा | दृष्ट्वा | उत्थाय | अपनेतुम् | अलम् |
| इति | इदानीं | किन्तु | किल | तथा | तत्र |
| च | तर्हि | तावत् | पुनः | वा | शीघ्रं |
| ईषद् | अवतरितुम् | सह | अपि | एवं | नूनम् |

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् | अन्यानि अव्ययानि |
| --- | --- | --- | --- |
| | | | |

**ग्रन्थानां ग्रन्थकर्तॄणां च यथोचितं पट्टिकां कुरुत।**

| | |
| --- | --- |
| कालिदासः | मुद्राराक्षसम् |
| भवभूतिः | ऊरुभङ्गः |
| शूद्रकः | उत्तररामचरितम् |
| भासः | मृच्छकटिकम् |
| शक्तिभद्रः | विक्रमोर्वशीयम् |
| अश्वघोषः | आश्चर्यचूडामणिः |
| विशाखदत्तः | शारीपुत्रप्रकरणम् |

| ग्रन्थः | ग्रन्थकर्ता |
| --- | --- |
| | |

**चर्चा**

**पुनः विलम्बस्य हेतुः कः स्यात्?**

चारुदत्तस्य इमं प्रस्तावमाधारीकृत्य वर्धमानकस्य विलम्बे हेतूनि चर्चित्वा लिखत।

**श्रद्धेयौ अंशौ**

आशयसंग्रहः।

भाषाप्रयोगः।

**क्षेमेण व्रज ..... इति श्लोकं पठित्वा आर्यकचारुदत्तयोः सम्भाषणं लिखत।**

**चारुदत्तस्य स्वभावमधिकृत्य चर्चां कृत्वा लघुटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

आशयसंग्रहः।

उचितपदस्वीकारः।

भाषाशुद्धिः।

**पटकथांशं सम्यक् पठित्वा सम्बोधनरूपाणि चित्वा लिखतु।**

**श्रद्धेयौ अंशौः**

सम्बोधनपरिचयः

चयनसामर्थ्यम्।

## अधिकविस्तरः

| नाटककारः | जीवनकालः | कृतयः |
|---|---|---|
| अश्वघोषः | क्रि.पू० प्रथम० | शारीपुत्रप्रकरणम् |
| भासः | क्रि.पू० द्वितीय० | चारुदत्तादि १३ नाटकानि |
| कालिदासः | क्रि.प० पञ्चम० | अभिज्ञनशाकुन्तलादि नाटकत्रयम् |
| दिङ्नागः | क्रि.प० पञ्चम० | कुन्दमाला |
| शूद्रकः | क्रि.प० षष्ठ० | मृच्छकटिकम् |
| श्रीहर्षः | क्रि.प० सप्तम० | नागानन्दम्,रत्नावली,प्रियदर्शिका नाटकम् |
| विशाखदत्तः | क्रि.प० सप्तम० | मुद्राराक्षसम् |
| भट्टनारायणः | क्रि.प० सप्तम० | वेणीसंहारः |
| भवभूतिः | क्रि.प० अष्टम० | उत्तररामचरितम्, मालतीमाधवम्, महावीरचरितम् |
| शक्तिभद्रः | क्रि.प० अष्टम० | आश्चर्यचूडामणिः |

## कोशः

| | | |
|---|---|---|
| आस्तरणम् | - प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः | (अम० २-९-४२) |
| उद्यानम् | - स्यादुद्यानं निस्सरणे वनभेदे प्रयोजने। | (अम० ३-१६-११७) |
| निगडः | - शृङ्खला पुंस्कटीकाञ्च्यां लोहरज्जौ च बन्धने। | (हैम०) |
| पीडा | - पीडाऽद्धबाधा वेदना दुःखम्। | (हलायुधकोशः) |
| मधुपः | - मधुव्रतो मधुकरो मधुलिण्मधुपालिनः। | ( अम०२-६-३१) |
| यानम् | - स्याद्वाहनं यानं युग्यं पत्रं च धोरणम्। | (अम०२–९-५८) |
| वणिक् | - वैदेहकः सार्थवाहो नैगमो वणिजो वणिक्। | (अम०२-१०-७८) |
| सखा | - मित्रं सखा सुहृत्। | (अम०२-९-१२) |

## प्रयोगविशेषः

| | |
|---|---|
| उद्यानं सर्वतः | - अभितः परितः उभयतः सर्वतः इत्यादीनां योगे द्वितीयाविभक्तिः। |
| अलं परिहासेन | - निषेधार्थकस्य अलम् इत्यस्य योगे तृतीयाविभक्तिः। |
| यानाद्बहिः | - बहिः शब्दयोगे पञ्चमीत्यनेन यानात् इति पञ्चमीविभक्तिः। |

## वृत्तपरिचयः

शार्दूलविक्रीडितम्। - सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।

(वृत्तरत्नाकरः/१०१)

## शब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलेयम् |
|---|---|---|---|---|
| अलं | पर्याप्तम् | മതി | ಸಾಕು | Enough |
| असंस्कार-रमणीयः | प्रकृत्या मनोहरः | പ്രകൃത്യാമനോഹരമായത് | ಮನೋಹರ-ವಾದ | Naturally beautiful |

| | | | | |
|---|---|---|---|---|
| आरात् | दूरे | ദൂരെ | ದೂರ | Far |
| ईषद् | अल्पमात्रम् | അല്പം | ಸ್ವಲ್ಪ | A bit of |
| उद्यानम् | आरामः | പൂന്തോട്ടം | ಹೂತೋಟ | Garden |
| औन्नत्यम् | महिमानं | മഹിമ | ಮಹಿಮೆ | Greatness |
| कारागृहम् | बन्धनगृहम् | തടവറ | ಕಾರಾಗೃಹ | Prison |
| चरणः | पादः | കാൽപാദം | ಪಾದ | Foot |
| जवनिका | यवनिका | തിരശ്ശീല | ಯವನಿಕೆ | Curtain |
| निगडः | शृङ्खला | ചങ്ങല | ಸಂಕೋಲೆ | Tether |
| नितराम् | अत्यन्तम् | അത്യന്തം | ಅತ್ಯಂತ | Highly/Too much |
| परिलसत् | शोभमानम् | ശോഭിക്കുന്ന | ಶೋಭಿಸುವ | Shining |
| पैतृककला | पारम्पर्यकला | പൈതൃകകല | ಪೈತೃಕಕಲೆ | Heritage art |
| प्रणम्य | नमस्कृत्य | നമസ്കരിച്ചിട്ട് | ನಮಸ್ಕರಿಸಿ | Having bowed |
| प्रायेण | बहुशः | മിക്കവാറും | ಹೆಚ್ಚಾಗಿಯೂ | Almost |
| मधुपः | भृङ्गः | വണ്ട് | ಭ್ರಮರ | Beetle |
| यथाशास्त्रम् | शास्त्रानुसारं | ശാസ്ത്രവിധി-<br>യനുസരിച്ച് | ಶಾಸ್ತ್ರಕ್ಕೆ<br>ಅನುಸಾರವಾಗಿ | As per Science |
| रक्षिपुरुषः | राजपुरुषः | പോലീസ് | ಆರಕ್ಷಕ | Police |
| वणिक् | क्रयविक्रेता | വ്യാപാരി | ವ್ಯಾಪಾರಿ | Merchant |
| व्यामुग्धः | आकृष्टः | ആകർഷിക്കപ്പെട്ടവൻ | ಆಕರ್ಷಿಸಲ್ಪಟ್ಟ | Being attracted |
| शकटम् | यानम् | വാഹനം | ವಾಹನ | Vehicle |
| सामोदम् | ससन्तोषम् | സന്തോഷത്തോടെ | ಸಂತೋಷದಿಂದ | With Pleasure |

## अभ्यासपत्रिका -३

**१. खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।**

उत्तरकेरलेषु प्रचारमाप्तं कलारूपं भवति पूरक्कलिः। इदं कलारूपं मीनमासे कृत्तिका-नक्षत्रात् आरभ्य पूर्वफाल्गुनिका (पूरम्) नक्षत्रपर्यन्तं मन्दिरेषु प्रचलति। कामदेवस्य पुनर्जननसंकल्पेन अयमुत्सवः आधुष्यते। कायिकी बौद्धिकी च क्रीडा भवतीयम्। तयोः बौद्धिकी क्रीडा भवति मरत्तुकलिः। पूरम् नक्षत्रे भगवत्याः स्नानात् परम् अस्य उत्सवस्य (पूरं कुलि इति कैरल्याम्) समापनं भवति।

क) पूरक्कलिः कस्मिन् मासे आचरति ?
ख) कस्य देवस्य पुनर्जननसंकल्पेन अयमाधुष्यते?
ग) बौद्धिकी क्रीडा का?
घ) भगवतीस्नानं केन नाम्ना व्यवह्रियते?
ङ) खण्डिकातः ल्यबन्तमव्ययरूपं चित्वा लिखत।

**२. प्रादेशिकभाषया लिखत।**

दशरूपकेषु अन्यतमं भवति प्रकरणम्। तेषु प्रसिद्धं प्रकरणद्वयं भवति मृच्छकटिकम् मालतीमाधवम् च। मृच्छकटिकस्य कर्ता शूद्रकः तथा मालतीमाधवस्य भवभूतिः च। इतिवृत्तस्य वैशिष्ट्येन मृच्छकटिकं सहृदयानां हृदयावर्जकं भवति । अस्मिन् नायकः भवति चारुदत्तः।

**३ कूटियाट्टम् इति कलारूपस्य वैशिष्ट्यमधिकृत्य सूचनानुसारं लघूपन्यासं लिखत।**

**सूचनाः -**

- संस्कृतरूपकस्य दृश्याविष्कारः।
- प्राचीनं कलारूपम्।
- युनेस्को सभायाः अङ्गीकारः।
- केरलेषु प्रचलति।

**४ नाटकम् , महाकाव्यम् इति विविच्य पट्टिकां करोतु।**

स्वप्नवासवदत्तम् , रघुवंशम्, किरातार्जुनीयम्, अभिज्ञानशाकुन्तलम्, प्रतिमानाटकम्, कुमारसम्भवम्, कर्णभारम्, शिशुपालवधम्, उत्तररामचरितम्, मृच्छकटिकम्, आश्चर्यचूडामणिः

५ **यथोचितं योजयत।**

कथाकेलिः - नङ्यारः ।
कूटियाट्टम् - कन्नटसाहित्यम् ।
ओट्टन्तुल्लल् - आट्टक्कथासाहित्यम् ।
चाक्यार्कूत्त् - संस्कृतनाटकसाहित्यम् ।
यक्षगानम् - शीतङ्कन् ।

६ **सूचनानुसारं चारुदत्तस्य कथापात्रस्वभावं निरूपयत।**

**सूचना -** दानकर्मणा दरिद्रः - वणिक् - परोपकारतत्परः - वसन्तसेना - आर्यकः - शरणागतरक्षणम् - उत्तमसौहृदम्।

## किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

एककम् ४

# चिन्तामणिः




## आमुखम्

चिन्तायाः विकासाय शास्त्रपठनं मननञ्चापेक्षितं भवति। निरुक्तादिशास्त्रं, महतां जीवनचरितं, चरित्रकाव्यपठनं च चिन्तोद्दीपनाय उपकारकं भवति। चिन्तामणि नामकेऽस्मिन्नेकके **शास्त्रं विज्ञानपूर्तये** इति विवरणम् **आत्मबोधो विमुक्तये** इति जीवनचरितं **वंशानुचरितम्** इति चरित्रकाव्यं चान्तर्भवति।

**प्रवेशकः** - भारतीयशात्रपैतृकमधिकृत्य चर्चां करोतु।

# पाठः ८

# शास्त्रं विज्ञानपूर्तये



सङ्गीतचित्रलेखनादिकलाविद्याम् आयुर्वेदगणितादिकं शास्त्रं चाधिकृत्य विशिष्य यत् ज्ञानमस्ति तत् विज्ञानम् इति कथ्यते। अमरकोशकारस्तु "विज्ञानं शिल्पशास्त्रयोः धीः" इति विज्ञानपदं निर्वक्ति। सङ्गीतम्, नाट्यम्, व्याकरणम्, गणितम्, ज्योतिषम्, निरुक्तम्, वास्तु, आयुर्वेदः, अलङ्कारः इत्यादिभिः विविधविज्ञानशाखाभिः सम्पन्ना इयं संस्कृतभाषा। संस्कृतकाव्यनाटकादीनाम् अनुशीलनेन विविधशास्त्रशाखानां समान्यपरिचयोऽपि प्रायेण सिद्ध्यति। तथापि विज्ञानपूर्तये शास्त्रानुशीलनमपि अवश्यं कर्तव्यम्। अतः शास्त्रत्रयस्य दिङ्मात्रनिरूपणमत्र क्रियते।

वेदाङ्गानि षट्।
शिक्षा कल्पो व्याकरणं
निरुक्तं ज्योतिषां गणः।
छन्दोविचितिरित्येतैः
षडङ्गो वेद उच्यते।



## निरुक्तम्

षट्सु वेदाङ्गेषु अन्यतमं भवति निरुक्तम्। यस्मिन् शास्त्रे पदानाम् अर्थाः निरुच्यन्ते -निश्शेषेण उच्यन्ते- तन्निरुक्तशास्त्रं भवति। पदानाम् अवयवार्थनिर्वचनमेव निरुक्तशास्त्रस्य मुख्यो विषयः। ब्राह्मणेषु एतादृश्याः अर्थकल्पनायाः प्राग्रूपं दृश्यते। किन्तु मूर्तरूपेण प्रथमतया रचितः निरुक्तग्रन्थः यास्कप्रणीत एव। यास्काचार्यः क्रिस्तोः पूर्वम् अष्टमे शतके ग्रन्थमिमं व्यरचयदिति केषाञ्चन विदुषामभिप्रायः। वैदिकशब्दानाम् अर्थनिर्णयः एव यास्कनिरुक्तस्य प्रतिपाद्यः। निघण्डुः इति प्रख्यातस्य वैदिकशब्दकोशस्य व्याख्यानरूपेण ग्रन्थोऽयं विरचितः। ग्रन्थेऽस्मिन् यथावसरं निर्वचनविधिं च समग्रतया विवृणोत्याचार्यः। नैघण्डुककाण्डः, नैगमकाण्डः, दैवताकाण्डः इति त्रयो भागाः अत्र वर्तन्ते।

वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः, धातोः अर्थयोगः चेति निरुक्तं पञ्चविधं भवति। अर्थप्राधान्यं पुरस्कृत्य निर्वचनं कर्तव्यमिति निरुक्तकारस्याभिमतः। यथा-

**आचार्यः** -आचारं ग्राहयति। अथवा आचारम् उपदिशति।

**आतपत्रम्** -आतपात् त्रायते ।

**वस्त्रम्** - वपुः त्रायते इति वपुस्त्रम्। (अत्र पुकारस्य लोपेन वस्त्रम् इति रूपसिद्धिः।)

**पारिजातः** - वारिणि जातः वारिजातः। (अत्र वकारस्य स्थाने पकारस्य वर्णविपर्ययेण पारिजातः।)

**पुराणम्** - पुरा नवम् -पुराणवम्। (अत्र वकारलोपेन पुराणम् इति रूपसिद्धिः।)

### वेदाङ्गानि

छन्दः पादौ तु वेदस्य  
हस्तौ कल्पोऽथ पठ्यते।  
ज्योतिषामयनं चक्षुः  
निरुक्तं श्रोत्रमुच्यते।।  
शिक्षा घ्राणं तु वेदस्य  
मुखं व्याकरणं स्मृतम्।  
तस्मात् साङ्गमधीत्यैव  
ब्रह्मलोके महीयते।।

### निरुक्तभेदाः

वर्णागमो वर्णविपर्ययश्च  
द्वौ चापरौ वर्णविकारनाशौ।  
धातोस्तदर्थातिशयेन योगः  
तदुच्यते पञ्चविधं निरुक्तम्।।

### हृदयपदनिरुक्तिः।

हृ -इत्येकमक्षरम् अभिहरति..,  
द- इत्येकमक्षरं ददाति..,  
य- इत्येकमक्षरं एति...।  
**(शतपथब्राह्मणम् १४-८-४-१)**

अशुद्धरक्तस्य अपहरणम्, शुद्धरक्तस्य प्रदानम्, सर्वत्र तस्य यापनम् इत्येदतस्ति हृदयस्य धर्म इति अनेन निर्वचनेन व्यनक्ति आचार्यः।

एतादृशरीत्या वर्णानां संयोगेन, विपरिणामेन, लोपेन, धात्वर्थानुसारं च शब्दाः निर्वक्तुं शक्यन्ते इत्यस्ति निरुक्तसिद्धान्तः। यास्काचार्यस्य निर्वचनविधयः आधुनिकभाषाशास्त्रकारैरपि अङ्गीकृताः समादृताश्च।।

## गणितम्

लोके विद्यमानानां समेषां शास्त्राणां निदानभूतं गणयति गणितशास्त्रम्। भारतीयगणितशास्त्रस्य प्रथमं विकसितरूपं शुल्बसूत्रे द्रष्टुं शक्यते। एतत्सूत्रं कल्पाख्ये वेदाङ्गे अन्तर्भवति। तत्र कल्पे बौधायन, कात्यायन, आपस्तम्ब, सत्याषाढ, मानव ,मैत्रायणी, वाराह्यादि सप्त आचार्याणां नामभिः प्रसिद्धानि शुल्बसूत्राणि सन्ति। ज्यामिती, वर्गमूलदशांशादि गणितविज्ञानस्य समग्राख्यानं तत्रैवास्ति। नलन्दा तक्षशिलाख्ययोः विश्वविद्यालययोः गणिताध्ययनस्याध्यापनस्य च प्राधान्यमासीत्। शास्त्रेऽस्मिन् निष्णाताः आर्यभटप्रमुखाः आचार्याः तत्रासन्। एते विद्वांसः भारतीयगणितशास्त्रस्य मार्गदर्शकाः भवन्ति। अत एव स कालः भारतीयगणितशास्त्रस्य सुवर्णकाल इति व्यवह्रियते। अस्मिन् विज्ञानमण्डले शून्यस्य आविष्कारः भारतीयगणितशास्त्रस्य योगदानमेव। केषाञ्चिदाचार्याणां योगदानं यथा-

| **आचार्यः** | **कालः** | **ग्रन्थाः** |
|---|---|---|
| आर्यभटः | पञ्चमे शतके | आर्यभटीयम् । |
| महावीरः | नवमशतके | गणितसारसङ्ग्रहः। |
| श्रीपतिः | एकादशशतके | गणिततिलकम् । |

कालान्तरे तच्च गणितशास्त्रं ज्योतिश्शास्त्रेण तथा वास्तुविद्यया च सह वृद्धिमाप।

# वास्तुशास्त्रम्

वसन्ति जनाः यत्र इति वास्तु। तदधिकृत्य यस्मिन् शास्त्रे विवृणोति तद् वास्तुशास्त्रम् इति कथ्यते। वास्तुशास्त्रचर्चाः वेदेषु बहुत्र वर्तन्ते। वास्तुविद्यायाः आधाररूपः स्थापत्यवेदः अथर्ववेदस्य उपवेदः इति गण्यते। मयमतम् , मानसारः, समराङ्गणसूत्रसारः इत्यादयः वास्तुशास्त्रप्रतिपादकाः ग्रन्थाः प्रसिद्धाः। गृहनिर्माणविधिम् अधिकृत्य श्रीमङ्गलं नीलकण्ठन् मूस्सत् महाशयेन विरचिता मनुष्यालयचन्द्रिका केरलीयवास्तुशास्त्रग्रन्थेषु प्रसिद्धास्ति। भूमिलक्षणम्, परिस्थितिविचारः इत्यादीनि च ग्रन्थेऽस्मिन् यथावसरं विवृणोति। अन्यैरपि आचार्यैः कालानुसारं परिष्कृता भारतीयवास्तुविद्या परिस्थितेरनुकूलाम् आवासव्यवस्थामाविष्कर्तुं सर्वथा उपकरोति।

### पदच्छेदः

चाधिकृत्य - च+अधिकृत्य ।
अमरकोशकारस्तु - अमरकोशकारः +तु।
सामान्यपरिचयोऽपि - सामान्यपरिचयः +अपि।
तन्निरुक्तशास्त्रम् - तत्+निरुक्तशास्त्रम्।
प्रणीत एव - प्रणीतः+एव।
अर्थनिर्णय एव - अर्थनिर्णयः+एव।
ग्रन्थोऽयम् - ग्रन्थः+अयम्।
ग्रन्थेऽस्मिन् - ग्रन्थे+अस्मिन्।
त्रयोऽध्यायाः - त्रयः+अध्यायाः।
चेति - च+इति।
इत्यस्ति - इति+अस्ति।
समादृताश्च - समादृताः+च।
तत्रैवास्ति - तत्र + एव +अस्ति।
शास्त्रेऽस्मिन् - शास्त्रे +अस्मिन्
केषाञ्चिदाचार्याणाम् - केषाञ्चिद् +आचार्याणाम्
तच्च - तत् +च
तदधिकृत्य - तद्+अधिकृत्य
अन्यैरपि - अन्यैः +अपि
परिस्थितेरनुकूलम् - परिस्थितेः +अनुकूलम्

**विग्रहः**

विज्ञानम् - विशिष्टं ज्ञानम्।
यथावसरम् - अवसरम् अनतिक्रम्य।
परिस्थितिः - परितः स्थितिः।

**कोशः**

वास्तु - धिष्ण्यमोको निवसनं स्थानं वास्तु निवेशनम्।

## पठनप्रवर्तनानि

**केनचिदाचार्येण सह शास्त्रविषयमधिकृत्य अभिमुखभाषणं कृत्वा लघुटिप्पणीं लिखतु।**

**श्रद्धेयांशाः**

प्रश्नवाचकशब्दानामुचितोपयोगः।

आशयव्यक्तता।

भाषाशुद्धिः।

**विविधशास्त्रग्रन्थानां ग्रन्थकाराणां च नामानि समाहृत्य विविच्य सम्पुटं निर्मातु।**

**श्रद्धेयांशौ**

विषयवैविध्यम्।

समग्रता।

**यस्य पदस्य निर्वचनम् इति विज्ञाय कोष्ठतः अनुयोज्यं पदं चित्वा पट्टिकां पूरयतु।**

| | | | |
|---|---|---|---|
| नारदः | पङ्कजम् | आचार्यः | शाखा |
| पादपः | पायसम् | तुरगः | केशः |
| इतिहासः | हिमवान् | औन्नत्यम् | ऐश्वर्यम् |

आचारं ग्राहयति ..........................................।

नारं (यथार्थज्ञानम्) ददाति ..........................................।

पयसा संस्कृतम् ..........................................।

इति इह आस ..........................................।

के (शीर्षे) शेते ..........................................।

हिमम् अस्ति अस्मिन् ..........................................।

ईश्वरस्य भावः ..........................................।

पङ्के जातम् ..........................................।

तुरेण (वेगेन) गच्छति ..........................................।

उन्नतस्य भावः ..........................................।

पादेन पिबति ..........................................।

खे (आकाशे) शेते ..........................................।

**मञ्जुषातः उचितं पदं स्वीकृत्य पट्टिकां पूरयत।**

| | | |
|---|---|---|
| आर्यभटः | वराहमिहिरः | पिङ्गलः |
| भोजराजः | यास्कः | आपस्तम्बः |
| ब्रह्मगुप्तः | श्रीमङ्गलं नीलकण्ठन्मूसत् | |
| मयः | सायणः | |

| गणितम् | वास्तुशास्त्रम् | निरुक्तम् |
|---|---|---|
| आर्यभटः | मयः | सायणः |

# पाठः ९

# आत्मबोधो विमुक्तये



केरलीयसामाजिकस्तरः इतरराज्यापेक्षया अत्युन्नतं विराजते। केरलेषु विद्यमानाः अनेके सामाजिकपरिष्कर्तारः एव अस्य निदानम्। अत्र शङ्कराचार्यादयो बहवः महात्मानः दार्शनिकाः अवर्तन्त ।इतरप्रदेशेषु इदानीमपि विद्यमानानि सामाजिकासमत्वानि केरलेषु तेषां परिष्कर्तॄणाम् अश्रान्तपरिश्रमेणैव अस्तंगतानि। तेषु केषाञ्चन महात्मनां जीवनमधिकृत्य एकैका घटना अत्र प्रतिपाद्यते।

श्री शङ्कराचार्यस्य जन्म कालट्यां पूर्णानद्याः तीरे क्रिस्त्वब्दे ७८८ तमे संवत्सरे अभूत्। पिता शिवगुरुः माता आर्याम्बा च। अद्वैतसिद्धान्तप्रघोषकोऽयं तत्प्रचारणाय चतुरः मठान् स्थापयामास। ब्रह्मसूत्रोपनिषद्भगवद्गीताभाष्याणां कर्तृत्वेन तथा सौन्दर्यलहरी विवेकचूडामणिः उपदेशसाहस्री दशश्लोकी इत्यादीनां स्वतन्त्रकर्तृत्वेन च प्रसिद्धोऽयं महात्मा द्वात्रिंशत् तमे वयसि यशःशरीरोऽभवत्।

## श्रीशङ्कराचार्यः (७८८-८२०)

सन्यासदीक्षार्थं प्रस्थितः श्रीशङ्करः मातुः देहवियोगावस्थां दिव्यदृष्ट्या प्रेक्ष्य समीपमागतवान्। प्रणामानन्तरं मातुः निर्देशानुसारं सद्य एव सः शिवभुजङ्गस्तोत्रं तथा विष्णुभुजङ्गस्तोत्रं च कृत्वा आललाप। विगतमरणशङ्का सा पुनः बाल्ये तस्य इष्टगीतं गोविन्दाष्टकं श्रोतुम् ऐच्छत्। मातुः देहवियोगानन्तरं समीपस्थाः जनाः तस्य साहाय्यं कर्तुं न सन्नद्धाः। मातुः मृतदेहसंस्कारादिकं पूर्णानद्याः तीरे स्वयमेव कृत्वा तस्याः स्तुतिरूपेण मातृपञ्चकं व्यरचयत् च । तस्मिन् प्रथमः श्लोकः यथा -

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी।
एकस्यापि न गर्भभारभरणक्लेशस्य यस्या क्षमो
दातुं निष्कृतिमुन्नतोऽपि तनयस्तस्यै जनन्यै नमः।।

अनन्तरम् आसेतुहिमाचलम् अटन् शङ्कराचार्यः संस्कृतभाषया एव तस्य अभिमतान् प्रचारयामास।

श्रीचट्टम्पिस्वामी १८५३ तमे वर्षे अनन्तपुर्यां कोल्लूर् नामके ग्रामे जनिमलभत। पिता वासुदेवशर्मा माता नङ्ङम्मप्पिल्ला च । कुञ्ञन् इत्यभिधोऽयं पाठशालायां छात्रनेतृत्वं निरवहत्। अतः अयं चट्टम्पीति आहूतः अभवत्। समाजपरिष्कर्तृत्वेन,नवोत्थाननायकत्वेन, आत्मीयाचार्यत्वेन चास्य स्थानं प्रसिद्धमेव। १९२४ तमे संवत्सरे पन्मनायाम् अस्य देहवियोगोऽभूत्। प्राचीनमलयालम्, वेदाधिकारनिरूपणम्, आदिभाषा, जीवकारुण्यनिरूपणमित्यादयः अस्य प्रधानकृतयः भवन्ति।

## श्रीचट्टम्पिस्वामी (१८५३-१९२४)

चट्टम्पिस्वामिनः समभावना प्रसिद्धा एव। तेन महात्मना साकं ये ये आसन् तेषां कार्येषु सः नितरां श्रद्धालुरासीत्। तेषामभिमानक्षतं कदापि न संभवेत् इति विषये सदा सः बद्धश्रद्धश्चासीत्। तादृशी एका घटना अत्र सूच्यते। एकदा एकस्मिन् गृहे विश्रमावसरे परवूर् न्यायाधीशः आण्डिपिल्ला महाभागः स्वामिनं स्वगृहे सत्कर्तुं निश्चित्याहूतवान्। स्वामी तु सुहृदा साकं न्यायाधीशभवनं सम्प्राप। भार्यासमेतः न्यायाधीशः स्वामिनं स्वीकृत्य गृहान्तर्भागं प्रवेष्टुमाहूतवान्। सन्दिहानं सुहृदमपि प्रवेष्टुं स्वामी निरदिशत्। भोजनावसरेऽपि सुहृदः स्थानं प्रकोष्ठात् बहिरिति ज्ञात्वा स्वस्यापि स्थानं तत्रैव अस्तु इति तात्पर्यं प्रकटयामास। स्वामिनः मनोगतं प्रत्यभिज्ञाय न्यायाधीशः तेन सार्धम् उभाभ्यामपि भोजनव्यवस्थां कृतवान्। आध्यात्मिकविषयेषु इव लौकिककार्येष्वपि समभावना कार्या इति स्वाशयं स्वजीवनेनैव स्वामी प्रचारयामास। असौ श्रीनारायणगुरुदेवस्य ज्येष्ठकल्पः सुहृच्चासीत् ।।

श्रीनारायणगुरुदेवः १८५६ तमे वर्षे चेम्पष़न्ति ग्रामे वयल्वारं भवने माटनाशान्-कुट्टियम्मयोः अपत्यत्वेन जनिमलभत। केरले समाजपरिष्कर्तृषु नवोत्थाननायकत्वेनायं प्रशस्तः । संस्कृते कैरल्यां च बहवः कृतयः तेन रचिताः। दर्शनमाला, निर्वृतिपञ्चकम् इत्यादयः संस्कृतग्रन्थाः तेन रचिताः। १९२८ तमे वर्षे शिवगिर्यां महानुभावोऽयं समाधिं प्राप।

## श्रीनारायणगुरुदेवः (१८५६-१९२८)

श्रीनारायणगुरुदेवस्य काले समाजे सर्वेषाम् आराधनास्वातन्त्र्यं न आसीत्। देवताराधनया विद्याभ्यासेन च समुदायोद्धारणं साध्यमिति ज्ञात्वा सः देवालयान्, विद्यालयान् च संस्थाप्य जनान् पठनाय प्रचोदितवान्। १८८८ तमे वर्षे गुरुदेवः 'अरुविप्पुरे ' एकां शिवप्रतिष्ठामकरोत् । तस्मिन्नवसरे प्रतियोगित्वेनागतानां पुरतः सः 'एतदस्माकं देव एव ' इत्युक्तवान् । पुनः तत्र एवं लिखितवान् - 'जातिभेदं मतद्वेषं विना यत्र नराः समे, सोदरत्वेन तिष्ठन्ति मातृकास्थानमप्यदः' इति। बाल्य एव संस्कृतपठनमारभ्य स असामान्यपाटवेन भारतीयकाव्येषु , शास्त्रेषु च निष्णातः समजनि। मितेन , हितेन सारेण च सम्भाषणेन विनयेन च सर्वेषु तोषं जनयामास । एवं कालान्तरे महानुभावोऽयं योगी पण्डितः कविः आचार्यः इत्यादिभिः बिरुदैः प्रथितोऽभवत्।

**पदच्छेदः**

| | | | |
|---|---|---|---|
| कोऽपि | - | कः | + अपि । |
| निष्कृतिमुन्नतोऽपि | - | निष्कृतिमुन्नतः | + अपि। |
| तनयस्तस्यै | - | तनयः | + तस्यै। |
| संस्कृतेनैव | - | संस्कृतेन | + एव। |
| श्रद्धालुरासीत् | - | श्रद्धालुः | + आसीत् । |
| इत्यस्मिन् | - | इति | + अस्मिन्। |
| स्वस्यापि | - | स्वस्य | + अपि । |
| तत्रैव | - | तत्र | + एव। |
| लौकिककार्येष्वपि | - | लौकिककार्येषु | + अपि । |
| स्वजीवनेनैव | - | स्वजीवनेन | + एव। |
| सुहृच्चासीत् | - | सुहृत् | + च + आसीत्। |
| इत्युक्तवान् | - | इति | + उक्तवान्। |

**विग्रहः**

| | | |
|---|---|---|
| न्यायाधीशः | - | न्याये अधीशः । |
| मनोगतम् | - | मनसि गतम्। |
| विगतमरणशङ्का | - | मरणे शङ्का मरणशङ्का, विगता मरणशङ्का यस्याः सा । |

**व्याकरणविशेषः**

स्वामी तु सुहृदा **साकं** न्यायाधीशभवनं संप्राप । - "सहयुक्तेऽप्रधाने" इति सूत्रेण सह समं साकं सार्धम् इत्येतैः योगे तृतीयाविभक्तिः।

जनन्यै **नमः** । - "नमःस्वस्तिस्वाहास्वधाऽलं वषड्योगाच्च" इति सत्रेण नमः शब्दस्य योगे चतुर्थी स्यात् ।

**धातुपरिचयः**

| | | |
|---|---|---|
| प्रचारयामास | - | प्र पूर्वक चर् धातोः णिच् परस्मैपदी लिट् प्र. पु. ए. व। |
| सूच्यते | - | सूच् परिशून्ये कर्मणि लट् प्र. पु. ए. व। |

| | | |
|---|---|---|
| अवर्तत | - | वृतु आत्मनेपदी लङ् म. पु. ब. व। |
| अदात् | - | दाञ् दाने लङ् प्र. पु. ए. व। |
| समजनि | - | सं पूर्वक जनि प्रादुर्भावे लुङ् कर्तरि कर्मणि च प्र. पु. ए.व |

## पठनप्रवर्तनानि।

**सूचनानुसारं महात्मनां जीवनचरितं लिखतु।**

***सूचना*** **- श्रीशङ्कराचार्यः - जीवनकालः ७८८-८२० - जन्मदेशः कालटि- बाल्ये संन्यासम्- अद्वैतप्रचारकः -भाष्यकारः ।**

**श्रद्धेयाः अंशाः**

जीवनचरितघटना।

सूचनानाम् उपयोगः।

भाषाशुद्धिः।

**उपन्यासस्य आशयं संगृह्य मातृभाषायां परिवर्त्य लिखतु ।**

**श्रद्धेयौ अंशौ**

आशयपूर्णता।

भाषाशुद्धिः।

**कमपि केरलीयसामाजिकपरिष्कर्तारम् अधिकृत्य लघुटिप्पणीं लिखतु ।**

**श्रद्धेयाः अंशाः**

आशयपूर्णता।

संक्षिप्तता।

औचित्यम्।

**वाक्येषु योजयतु।**

अ) नितराम् , आ) अत्यधिकम् , इ) अतीव ।

**श्रद्धेयाः अंशाः**

आशयपूर्णता।

संक्षिप्तता।

वाक्यघटना।

**केषाञ्चन सामूह्यपरिष्कर्तॄणां छायाचित्रसहितं जीवनचरितं सञ्चित्य सम्पुटमेकं रचयतु।**

**श्रद्धेयाः अंशाः**

आशयपूर्णता।

उचिता भाषाशैली।

उचितं दत्तशेखरणम्।

## अधिकविस्तरः।

### श्रीनारायणगुरोः सन्देशाः

१. एका जातिः एको धर्म एकं दैवतं मर्त्यानाम्।

२. कोऽपि वा भवेद्धर्मः मानवः सज्जनो भवेत्।

३. मा पृच्छ, मा वद , मा चिन्तय जातिम्।

४ जातिभेदं मतद्वेषं विना यत्र नराः समे।
सोदरत्वेन तिष्ठन्ति मातृकास्थानमप्यदः।।

५. मनुष्याणां मनुष्यत्वं जातिर्गोत्वं गवां यथा।

६. मद्यं विषमेव, तन्मा पच, मा पिब, मा यच्छ।

७. आत्महिताय यदाचरितं भुवि परहिताय तदस्तु महीतले।।

८. धर्मो हि परमं दैवं धर्म एव महाधनम्।

९. सम्मिलन्तु सम्मिलन्तु योग्यतां समार्जयन्तु विद्यया प्रबुद्धतां यान्तु मानवास्सदा।।

**अय्यङ्कालिः**

| | | |
|---|---|---|
| नाम | - | अय्यङ्कालि। |
| जन्म | - | १८६३ |
| मरणम् | - | १९४१ |
| जन्मदेशः | - | वेङ्डानूर्। |
| पितरौ | - | अय्यन्- माला च |
| प्रधानघटनाः | - | विद्याभ्यसनार्थं तथा |

सञ्चारस्वातन्त्र्यार्थं च आन्दोलनं चालयति स्म। अधःस्थितेभ्यः जनेभ्यः श्रीमूलं प्रजासभां प्राप्तः प्रथमनेता।

जीवितसन्देशः - विद्याभ्यासेनैव विमोचनं साध्यम्।





**वक्कम् मुहम्मद् अब्दुल् खादर् मौलवी**

| | | |
|---|---|---|
| नाम | - | वक्कम् मुहम्मद्अब्दुल् खादर् मौलवी। |
| जन्म | - | १८७३ |
| मरणम् | - | १९३२ |
| जन्मदेशः | - | वक्कं (तिरुवनन्तपुरम्)। |
| पितरौ | - | मुहम्मद्कुञ्ञ् हाषुबी च। |
| प्रधानघटनाः | - | स्वदेशाभिमानि पत्रस्य इस्लामिक धर्मपरिपालनसङ्घस्य च संस्थापकः। |
| **सन्देशः** | - | विज्ञानेन मुक्तिं प्राप्नोतु। |



**चावर अच्चन्।**

| | |
|---|---|
| नाम | कुर्याक्कोस् एलियास् चावर। |
| जन्म | १८०५ फेब्रुवरि १० आलप्पुषा, कैनकरी। |
| प्रवर्तनानि | क्रिस्तीयपुरोहितः , सामाजिकपरिष्कर्ता, संस्कृतपाठशालास्थापकः, संस्कृतमुद्रणालयस्थापकः, सर्वधर्मावलम्बिनां विद्याभ्यसनाय पाठशाला स्थापनम्। |
| कृतयः | आत्मानुतापम्, मान्नानं नालागमम् ,ध्यानसंलापङ्गल् इत्यादीनि। |
| मृत्युः | १८७१ जनुवरी ३,कोच्चि। |

आस्तां तावदियं........ ।।

**अन्वयः** प्रसूतिसमये इयं दुर्वारशूलव्यथा , नैरुच्यं तनुशोषणं, सांवत्सरी मलमयी शय्या च आस्तां तावत् । यस्याः गर्भभारभरणक्लेशस्य एकस्य अपि निष्कृतिं दातुं तनयः उन्नतः अपि न क्षमः । तस्यै जनन्यै नमः ।

**व्याख्या** प्रसवसमये कठिनवेदना, नीरुचिः, शरीरशोषणं , मलप्रचुरा सांवत्सरी शय्या एतत् सर्वं भवतु नाम । गर्भभारभरणदुःखस्य एकस्य अपि प्रतिफलं दातुं पुत्रः उन्नतः अपि न समर्थः भवति। तादृश्यै जनन्यै नमः ।

നിൽക്കട്ടേ പേറ്റുനോവിൻ കഥ രുചികുറയും കാലമേറെച്ചടപ്പും
പോയ്കോട്ടേ കൂട്ടിടേണ്ട മലമതിലൊരു കൊല്ലം കിടക്കും കിടപ്പും
ഓർക്കുമ്പോൾ ഗർഭമാകും പെരിയചുവടെടുക്കുന്നതിൻ കൂലിപോലും
നീക്കാവല്ലെത്രകേമൻ മകനുമതുനിലയ്ക്കുള്ളൊരമ്മേ തൊഴുന്നേൻ.

**प्रवेशकः - स्वदेशस्य चरित्रप्राधान्यमधिकृत्य चर्चां करोतु।**

# पाठः १०

# वंशानुचरितम्



## आमुखम्

केरलीयचरित्रकाव्येषु अन्यतमं भवति **मूषिकवंशम्**। अतुलकविना विरचितेऽस्मिन् काव्ये उत्तरकेरलेषु वर्तमानस्य एषिमलानामकदेशस्य ऐतिहासिककथाः उपवर्णिताः । घोरे संग्रामे मृतिं प्राप्तस्य माहिष्मतीराजस्य आसन्नप्रसवा पत्नी कुलगुरोः साहाय्येन कोलमारुह्य नदीं तीर्त्वा एषिमला नाम गिरिं प्राप। मूषिकवृक्षैः निबिडे पर्वते गुहायाम् उषित्वा सा बालकमेकं प्रासूत। कुमारं तं परशुरामः अस्य देशस्य राजानमकरोत्। स एव मूषिकवंशस्य स्थापकः रामघटमूषिकः इति पश्चात् प्रख्यातः। मूषिकवृक्षैः (शिरीषैः) समावृतो देशः अस्य आस्थानम् इत्यनेन वंशस्यास्य नाम मूषिकवंश इति सञ्जातः।

पञ्चदशसर्गात्मकस्य मूषिकवंशकाव्यस्य त्रयोदशसर्गात् उद्धृताः केचन श्लोकाः पाठभागे दत्ताः। द्वित्राणां मूषिकवंशभूपानां चरितमेवात्र सूचितम्।

जयमानी नाम्नः राज्ञः भागिनेयः वलभः मूषिकदेशस्य राजा बभूव।

**अथ तस्य विभोरनन्तरो**

**विजयी सद्गुणरत्नसागरः।**

**बलभद्रसमानविग्रहो**

**वलभो नाम बभूव पार्थिवः ।। १**

**पदच्छेदः**

विभोरनन्तरो विजयी - विभोः + अनन्तरः + विजयी ।

बलभद्रसमानविग्रहो वलभो नाम - बलभद्रसमानविग्रहः + वलभः + नाम।

**विग्रहः**

सद्गुणरत्नसागरः - सद्गुणाः एव रत्नानि सद्गुणरत्नानि,
तेषां सागरः इव यः सः ।

बलभद्रसमानविग्रहः - बलभद्रेण समानः विग्रहः यस्य सः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अथ | अनन्तरम् |
| तस्य विभोः | तस्य राज्ञः (जयमानी इति राज्ञः) |
| अनन्तरः | अनन्तरजातः |
| विजयी | प्राप्तविजयः |
| बलभद्रसमानविग्रहः | बलरामस्य समानरूपी |
| सद्गुणरत्नसागरः | सद्गुणसम्पन्नः |
| वलभो नाम | वलभ इति प्रसिद्धः |
| पार्थिवः | भूपतिः |
| बभूव । | अभवत्। |

**भावार्थः**

मूषिकवंशभूपतिषु अन्यतमस्य जयमानिनः अनन्तरं तस्य भागिनेयः बलभद्रसदृशः विक्रमशाली सकलप्रतापगुणवान् वलभो नाम राजा अभवत्।

राज्ञः वलभस्य धीरतामेवं वर्णयति।

**रणदर्पविकस्वरेष्वलं**

**मुखरा यस्य मुहुः शिलीमुखाः।**

**वदनाम्बुरुहेषु विद्विषां**

**पतिताः प्राणमधून्युपादधुः ।। २**

**पदच्छेदः**

रणदर्पविकस्वरेष्वलम् - रणदर्पविकस्वरेषु + अलम्।

प्राणमधून्युपादधुः - प्राणमधूनि + उपादधुः।

**विग्रहः**

रणदर्पविकस्वरेषु - रणेषु दर्पः रणदर्पः तेन विकस्वरः रणदर्पविकस्वरः तेषु ।

प्राणमधूनि - प्राणाः एव मधु प्राणमधु तानि।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यस्य | वलभस्य |
| मुखराः | मुखरिताः |
| शिलीमुखाः | बाणाः/ भ्रमराः |
| रणदर्पविकस्वरेषु | युद्धमदेन विकासोन्मुखेषु |
| विद्विषाम् | शत्रूणाम् |
| वदनाम्बुरुहेषु | मुखपद्मेषु |
| पतिताः(सन्तः) | निपतिताः (सन्तः) |

| | |
|---|---|
| मुहुः | पुनः |
| प्राणमधूनि | प्राणमकरन्दानि |
| उपादधुः | अपिबन् |
| अलम्। | पर्याप्तम्। |

**भावार्थः**

युद्धावसरे वलभप्रयुक्ताः शब्दमुखरिताः तीक्ष्णबाणाः भ्रमराः इव युद्धदर्पेण विकसितोन्मुखेभ्यो शत्रुमुखपङ्कजेभ्यो प्राणमधूनि अपिबन् ।

*वलभः नृपरामम् (रिपुराममिति नामान्तरम्) भटस्थलीदेशस्य राजानमकरोत्।*

**अपनुद्य ततस्ततो रिपून्**
**स्वपरित्राणपरायणोद्यमान्।**
**नृपतिर्निजवंशकेतवे**
**नृपरामाय ददौ भटस्थलीम्।। ३**

**पदच्छेदः**

| | | |
|---|---|---|
| ततस्ततो रिपून् | - | ततः + ततः + रिपून्। |
| नृपतिर्निजवंशकेतवे | - | नृपतिः + निजवंशकेतवे। |

**विग्रहः**

| | | |
|---|---|---|
| स्वपरित्राणपरायणोद्यमान् | - | स्वस्य परित्राणं स्वपरित्राणं, तदर्थं परायणः स्वपरित्राणपरायणः, तस्मिन् उद्यमः यस्य सः स्वपरित्राणपरायणोद्यमः तान्। |
| निजवंशकेतवे | - | निजवंशस्य केतुः निजवंशकेतुः , तस्मै। |
| नृपतिः | - | नृणां पतिः, नृपतिः। |

| अन्वयः | अन्वयार्थः |
| --- | --- |
| नृपतिः | नरपतिः (वलभः इति यावत्) |
| स्वपरित्राणपरायणोद्यमान् | स्वप्राणरक्षार्थं पलायमानान् |
| रिपून् | शत्रून् |
| ततस्ततः | तदनन्दरम् |
| अपनुद्य | दूरीकृत्य |
| निजवंशकेतवे | स्ववंशालङ्कारभूताय |
| नृपरामाय | रामो नाम राज्ञे |
| भटस्थलीम् | भटस्थली नाम देशम् |
| ददौ । | प्रायच्छत्। |

**भावार्थः**

अथ स्वप्राणरक्षार्थं पलायमानान् शत्रून् दूरीकृत्य वलभो नाम राजा स्ववंशालङ्कारभूताय नृपरामाय 'भटस्थली' नाम देशं प्रददौ ।

**कोशः**

रिपुः - रिपौ वैरिसपत्नारिद्विषद्वेषणदुर्हृदः । इत्यमरः।

*वलभस्यानुजः कुन्दवर्मा नारायणपुरं नाम मन्दिरं नवीकृतवान्।*

**अभिरक्ष्य भुवं चिराय यो**
**विभवैर्न्यायवशादुपार्जितैः।**
**व्यधित प्रथितं मुरद्विषो**
**भुवि नारायणपूर्वकं पुरम्।। ४**

**पदच्छेदः**

यो विभवैर्न्यायवशादुपार्जितैः - यः + विभवैः + न्यायवशात् + उपार्जितैः।

मुरद्विषो भुवि - मुरद्विषः + भुवि।

**विग्रहः**

मुरद्विषः - मुरं द्वेष्टि इति मुरद्विट् , तस्य ।

| **अन्वयः** | **अन्वयार्थः** |
| --- | --- |
| यः | वलभस्यानुजः (कुन्दवर्मा) |
| चिराय | चिरकालम् |
| न्यायवशादुपार्जितैः | न्यायकर्मभिः समार्जितैः |
| विभवैः | धनैः |
| भुवम् | देशम् |
| अभिरक्ष्य | संरक्ष्य |
| भुवि | तस्मिन् देशे |
| प्रथितम् | प्रसिद्धम् |
| मुरद्विषः | विष्णोः |
| नारायणपूर्वकं पुरम् | नारयणनामकं मन्दिरम् |
| व्यधित । | नवमकरोत्। |

**भावार्थः**

कुन्दवर्मा नाम राजा चिरकालं सत्कर्मभिः आर्जितैः धनसम्पद्भिः देशभरणं सम्यक् कृतवान् । सः तस्मिन् देशे नारायणपुरनामकं विष्णुमन्दिरं नवीकृतवान् ।

*कुन्दवर्मणः अनन्तरं तस्य भागिनेयः पालकः देशेऽस्मिन् राजा बभूव।*

**अथ तत्र नृपे यशोनिधौ**
**स्मरणीयां गतिमभ्युपेयुषि ।**
**स्वसुरस्य सुतः स्मराकृतिः**
**पृथिवीं पालयति स्म पालकः ।। ५**

**पदच्छेदः**

स्वसुरस्य - स्वसुः + अस्य ।

**विग्रहः**

यशोनिधौ - यशसां निधिः यशोनिधिः, तस्मिन् ।
स्मराकृतिः - स्मरस्य आकृतिः इव आकृतिः यस्य सः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अथ | अनन्तरम् |
| तत्र | तस्मिन् देशे |
| यशोनिधौ | सुप्रशस्ते (सुकीर्तिसम्पन्ने) |
| नृपे | राजनि (कुन्दवर्मा नाम राजनि) |
| स्मरणीयां गतिम् | नामावशेषामवस्थाम् (मृतिम् ) |
| अभ्युपेयुषि (सति) | सम्प्राप्ते (सति) |
| अस्य | एतस्य (राज्ञः कुन्दवर्मणः) |
| स्वसुः | सोदर्याः |
| स्मराकृतिः | कामदेवसदृशः |
| सुतः | पुत्रः (भागिनेयः) |
| पालकः | पालको नाम राजा |
| पृथिवीम् | भूमिम् (मूषिकदेशम्) |
| पालयति स्म। | अपालयत्। |

**भावार्थः**

प्रशस्तस्य राज्ञः कुन्दवर्मणः मरणानन्तरं तस्य भागिनेयः पालकः नाम राजा मूषिकदेशं पालयति स्म।

## पठनप्रवर्तनानि।

**श्लोकान् सतालमालपतु।**

***श्रद्धेयाः अंशाः***

*उचिततालः।*

*भावात्मकता।*

*उच्चारणशुद्धिः।*

**श्लोकानामाशयं सङ्गृह्य वदतु लिखतु च।**

***श्रद्धेयाः अंशाः***

*आशयपूर्तिः।*

*भाषाशुद्धिः।*

*औचित्यम्।*

**कानिचित् केरलीयचरित्रकाव्यानि अधिकृत्य लघुटिप्पणीं लिखतु।**

***श्रद्धेयाः अंशाः***

*आशयव्यक्तता।*

*भाषाशुद्धिः।*

*औचित्यम्।*

**केरले विद्यमानानां देशानां पौराणिकनामानि अत्र दीयन्ते। तेषाम् इदानीन्तननामानि लिखित्वा पट्टिकां पूरयतु।**

| पौराणिकनामानि | इदानीन्तननामानि |
|---|---|
| कोटिलिङ्गपुरम् | |
| गोश्रीपुरम् | |
| सह्यामलकम् | |
| कुक्कुटक्रोडपुरम् | |
| स्यानन्दूरपुरम् | |
| तृश्शिवपुरम् | |

**अधोनिर्दिष्टाः ग्रन्थाः कस्मिन् विभागे अन्तर्भवन्ति इति विविच्य पट्टिकां पूरयतु।**

| | | | |
|---|---|---|---|
| आङ्गलसाम्राज्यम् | कुमारसम्भवम् | मूषिकवंशम् | किरातार्जुनीयम् |
| चण्डीशतकम् | नैषधीयचरितम् | केरलोदयः | नारायणीयम् |
| विशाखविजयम् | मूकपञ्चशति | शिशुपालवधम् | नवभारतम् |

| **महाकाव्यम्** | **चरित्रकाव्यम्** | **स्तोत्रकाव्यम्** |
|---|---|---|
| | | |

## क्रियारूपाणि

उपादधुः - उप, आङ् -उपसर्गपूर्वक (डु)धाञ् -धारणपोषणयोः परस्मैपदी लिट् प्र.पु.ब.वचनम्।

| | | | |
|---|---|---|---|
| **प्र. पु -** | दधौ | दधतुः | दधुः |
| **म. पु -** | दधिथ/दधाथ | दधथुः | दध |
| **उ. पु -** | दधौ | दधिव | दधिम |

व्यधित -वि उपसर्गपूर्वक (डु)धाञ् -धारणपोषणयोः आत्मनेपदी लुङ् प्र.पु.ए.वचनम्।

| | | | |
|---|---|---|---|
| **प्र. पु -** | अधित | अधिषाताम् | अधिषत |
| **म. पु -** | अधिथाः | अधिषाथाम् | अधिढ्वम् |
| **उ. पु -** | अधिषि | अधिष्वहि | अधिष्महि।। |

# शब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलेयम् |
|---|---|---|---|---|
| अभिधा | नाम | പേര് | ಹೆಸರು | Name |
| अभिलाषपूर्तिः | इच्छासाफल्यम् | ആഗ്രഹ സാഫല്യം | ಆಗ್ರಹ ಸಾಫಲ್ಯ | Fullfilment of desire |
| अम्बुरुहः | कमलम् | താമര | ತಾವರೆ | Lotus |
| अश्रान्तपरिश्रमः | निरन्तरपरिश्रमः | നിരന്തര പരിശ്രമം | ನಿರಂತರ ಪ್ರಯತ್ನ | Continuous effort |
| आख्यानम् | व्याख्यानम् | വ്യാഖ്യാനം | ವ್ಯಾಖ್ಯಾನಲು | Narration |
| आख्ये | नामधेये | പേരിൽ | ಹೆಸರಿನಲ್ಲಿ | In the name of |
| आतपत्रम् | छत्रम् | കുട | ಕೊಡೆ | Umbrella |
| आत्मबोधः | ब्रह्मज्ञानम् | ബ്രഹ്മജ്ഞാനം | ಬ್ರಹ್ಮಜ್ಞಾನ | The ultimate knowledge |
| आसन्नप्रसवा | पूर्णगर्भिणी | പൂർണ്ണഗർഭിണി | ಪೂರ್ಣಗರ್ಭವತಿ ಬಸಿರು / ಗರ್ಭಿಣಿ | Pregnant lady about to deliver |
| उपादधुः | अपिबन् | കുടിച്ചു | ನೀರು ಕುಡಿತು | Drunk |
| कोलः | नौका | വഞ്ചി | ದೋಣಿ | Boat |
| कृतितल्लजः | प्रशस्ता कृतिः | ഉത്കൃഷ്ട കൃതി | ಪ್ರಸಿದ್ಧ ಕೃತಿ | Beautiful Composition |
| ज्येष्ठकल्पः | ज्येष्ठसदृशः | ജ്യേഷ്ഠതുല്യൻ | ಹಿರಿಯಣ್ಣನಿಗೆ ಸಮಾನ | Equal to elder brother |
| दिङ्मात्रम् | अल्पमात्रम् | കുറച്ചുമാത്രം | ಸ್ವಲ್ಪಮಾತ್ರ | A little |
| दिदृक्षति | द्रष्टुम् इच्छति | കാണാൻ ആഗ്രഹിക്കുന്നു | ನೋಡಲು ಆತುರ | Desires to see |
| द्विट् | शत्रुः | ശത്രു | ಶತ್ರು | Enemy |
| निर्वक्तुम् | निर्वचनं कर्तुम् | നിർവചിക്കുവാൻ | ನಿರ್ವಚಿಸಲು | To define |
| निष्कृतिः | प्रतिकृतिः | കടം വീട്ടൽ | ಸಾಲತೀರಿಸಲು | Paying debt |

| | | | | |
|---|---|---|---|---|
| निष्णातः | समर्थः | സമർത്ഥൻ | ಚತುರ | Efficient |
| परित्रातुम् | रक्षितुम् | രക്ഷിക്കാൻ | ರಕ್ಷಿಸಲು | To save |
| पार्थिवः | राजा | രാജാവ് | ಅರಸು | King |
| पुरस्कृत्य | पुरः कृत्वा | മുൻനിർത്തിയിട്ട് | ಮುಂದೆಇಟ್ಟು | Having placed in front of |
| प्रख्यातः | प्रसिद्धः | പ്രസിദ്ധൻ | ಪ್ರಖ್ಯಾತ | Famous |
| प्रतियोगित्वम् | मात्सर्यम् | മത്സരം | ಸ್ಪರ್ಧೆ | Competition |
| प्रणीतः | रचितः | രചിക്കപ്പെട്ട | ರಚಿಸಲ್ಪಟ್ಟ | Composed |
| प्राग्रूपम् | पूर्वरूपम् | പൂർവരൂപം | ಪೂರ್ವರೂಪ | Previous form |
| ब्रह्मभूयः | ब्रह्मत्वम् | ദിവംഗതൻ | ದಿವಂಗತ | Dead |
| भागिनेयः | सहोदरीपुत्रः | അനന്തരവൻ | ಸಹೋದರಿ ಪುತ್ರ | Nephew |
| मठः | धाम | മഠം | ಧಾಮ | Math |
| मनोगतम् | अभिप्रायः | ഉള്ളിലിരുപ്പ് | ಇಚ್ಛೆ | Notion |
| मूषिकः | शिरीषः | ശിരീഷപുഷ്പം | ಶಿರೀಷ ಹೂ | Shireesha Flower |
| वपुः | कायः | ശരീരം | ಶರೀರ | Body |
| विमुक्तः | स्वतन्त्रः | മോക്ഷം സിദ്ധിച്ച | ವಿಮೋಚನೆ | Liberated |
| विवृणोति | विशदीकरोति | വിവരിക്കുന്നു | ವಿವರಿಸುತ್ತದೆ | Explaining |
| व्यवह्रियते | उच्यते | പറയപ്പെടുന്നു | ಹೇಳಲ್ಪಡುತ್ತದೆ | Being said |
| शिलीमुखः | बाणः | ബാണം /വണ്ട് | ಬಾಣ / ದುಂಬಿ | Arrows/beetle |
| समग्रम् | समस्तम् | മുഴുവൻ | ಎಲ್ಲಾ | Whole |
| समेषाम् | सर्वेषाम् | എല്ലാവരുടെയും | ಎಲ್ಲರ | Of everybody |
| सांवत्सरी | संवत्सरं यावत् | ഒരു വർഷം വരെ | ಒಂದು ವರ್ಷದ ವರೆಗೆ | Upto one year |
| स्मरः | कामः | കാമദേവൻ | ಕಾಮದೇವ | Cupid |

# अभ्यासपत्रिका -३

## १) उदाहरणानुसारं विग्रहवाक्यानि लिखतु।

उदा - सपल्लवम् - पल्लवेन सह वर्तते।
सबहुमानम् - ........................।
सादरम् - ........................।

## २) खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखतु।

षट्सु वेदाङ्गेषु प्रमुखं भवति व्याकरणम् । संस्कृतवैयाकरणेषु प्रसिद्धोऽस्ति भगवान् पाणिनिः । तेन विरचिता अष्टाध्यायी पाणिनीयम् इति प्रसिद्धम् भवति। सूत्ररूपेण विरचितेऽस्मिन् ग्रन्थे माकिं चतुस्सहस्रसूत्राणि विद्यन्ते। संस्कृतभाषायाः समग्रमपि व्याकरणकार्यम् अत्र संक्षेपेण प्रतिपादयति।

१) ‘ समस्तम् ’ इत्यर्थकं पदं किम्?
२) अष्टाध्याय्याः कर्ता कः ?
३) षट्सु वेदाङ्गेषु प्रमुखं किम्?
४) **विरचितेऽस्मिन्** इति पदं विश्लेषयत ।

## ३) यथोचितं योजयत।

आतपत्रम् - अलं करोति अनेन।
पुराणम् - वपुः त्रायते।
आचार्यः - पुरा नवम्।
वस्त्रं - आतपात् त्रायते।
अलङ्कारः - आचारं ग्राहयति।

**४) सूचनामनुसृत्य लघूपन्यासं लिखतु।**

***सूचना -***

प्रथमः विश्वविद्यालयः – तक्षशिला – सहस्राधिकाः छात्राः – नालन्दा – सिन्धुनदीतटसंस्कृतिः।

**५) वेदानां वेदाङ्गानां च विविच्य पट्टिकां रचयतु।**

| | | | |
|---|---|---|---|
| सामः | कल्पम् | छन्दः | ऋक् |
| ज्योतिषम् | निरुक्तम् | अथर्वः | शिक्षा |
| व्याकरणम् | यजुः | | |

# किमधिगतम्?

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम-संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

## കുറിപ്പുകൾ

## കുറിപ്പുകൾ

# ഭാരതത്തിന്റെ ഭരണഘടന

## ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ്:**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയ സേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സംസ്കാരസമന്വയത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക.

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹ്യനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മിഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപത്കരമായ ജോലികളിൽ നിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽ നിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.


ബന്ധപ്പെടേണ്ട വിലാസം:

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**
'ശ്രീ ഗണേഷ്', റ്റി.സി. 14/2036, വാൻറോസ് ജംഗ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം-34, ഫോൺ: 0471-2326603
ഇ-മെയിൽ: childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ്: www.kescpcr.kerala.gov.in


**ചൈൽഡ് ഹെൽപ്പ്ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ - 1800 425 1400**
**കേരള പോലീസ് ഹെൽപ്പ് ലൈൻ - 0471 - 3243000/44000/45000**

*online R.T.E Monitoring: www.nireekshana.org.in*